ओं नमः परमात्मने श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

# द्वितीय काण्डे प्रथमः प्रश्नः

# Version Notes:

**This is now the current Version 1.1 dated July 31, 2022**

1. This replaces the earlier version 1.0 dated October 31, 2021.

2. The corrections found and reported till July 31, 2022 are updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th June 2018 |
| 2nd | Version Number | 1.0 dated 31st Aug 2021 |
| 3rd | Version Number | 1.0 dated 31st Oct 2021 |

# Table of Contents

2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ..................................... 4

2.1 द्वितीय काण्डे प्रथमः प्रश्नः - पशुविधानम् ................................ 4

================================

ओं नमः परमात्मने श्री महागणपतये नमः

श्री गुरुभ्यो नमः हरिः ओं

# 2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 2.1 द्वितीय काण्डे प्रथमः प्रश्नः – पशुविधानम्

**T.S.2.1.1.1 - Kramam**

वायव्यꣳ श्वेतम् । श्वेतमा । आ लभेत । लभेत भूतिकामः ।
भूतिकामो वायुः । भूतिकाम इति भूति – कामः । वायुर् वै ।
वै क्षेपिष्ठा । क्षेपिष्ठा देवता । देवता वायुम् । वायुमेव । एव स्वेन ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सः । स एव । एवैनम् । एनम् भूतिम् । भूतिम्
गमयति । गमयति भवति । भवत्येव । एवातिक्षिप्रा । अतिक्षिप्रा
देवता । अतिक्षिप्रेत्यति – क्षिप्रा । देवतेति । इत्याहुः । आहुः सा ।
सैनम् । एनमीश्वरा । ईश्वरा प्रदहः । प्रदह इति । प्रदह इति
प्र – दहः । इत्येतम् । एतमेव । एव सन्तम् । सन्तꣳ वायवे । वायवे
नियुत्वते । नियुत्वत आ । नियुत्वत इति नि – युत्वते । आ लभेत ।
लभेत नियुत् । नियुद् वै । नियुदिति नि – युत् । वा अस्य ।

अस्य धृतिः । धृतिर् धृतः । धृत एव । एव भूतिम् । भूतिमुप ।
उपैति । एत्यप्रदाहाय । अप्रदाहाय भवति ।
अप्रदाहायेत्यप्र – दाहाय । भवत्येव । एव वायवे । **1 (50/57)**

**T.S.2.1.1.2 - Kramam**

वायवे नियुत्वते । नियुत्वत आ । नियुत्वत इति नि – युत्वते ।
आ लभेत । लभेत ग्रामकामः । ग्रामकामो वायुः । ग्रामकाम इति
ग्राम–कामः । वायुर् वै । वा इमाः । इमाः प्रजाः । प्रजा नस्योताः ।
प्रजा इति प्र – जाः । नस्योता नेनीयते । नस्योता इति
नसि – ओताः । नेनीयते वायुम् । वायुमेव । एव नियुत्वन्तम् ।
नियुत्वन्त॒ꣳस्वेन । नियुत्वन्तमिति नि–युत्वन्तम् । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति ।
धावति सः । स एव । एवास्मै । अस्मै प्रजाः । प्रजा नस्योताः ।
प्रजा इति प्र – जाः । नस्योता नि । नस्योता इति नसि – ओताः ।
नि यच्छति । यच्छति ग्रामी । ग्राम्येव । एव भवति ।
भवति नियुत्वते । नियुत्वते भवति । नियुत्वत इति नि – युत्वते ।

भवति ध्रुवाः । ध्रुवा एव । एवास्मै । अस्मा अनपगाः । अनपगाः करोति । अनपगा इत्यनप–गाः । करोति वायवे । वायवे नियुत्वते । नियुत्वत आ । नियुत्वत इति नि – युत्वते । आ लभेत । लभेत प्रजाकामः । प्रजाकामः प्राणः । प्रजाकाम इति प्रजा – कामः । प्राणो वै । प्राण इति प्र – अनः । वै वायुः । वायुरपानः । अपानो नियुत् । अपान इत्यप – अनः । नियुत् प्राणापानौ । नियुदिति नि – युत् । प्राणापानौ खलु । प्राणापानाविति प्राण – अपानौ । खलु वै । वा एतस्य । एतस्य प्रजायाः । प्रजाया अप । प्रजाया इति प्र – जायाः । **2 (50/67)**

**T.S.2.1.1.3 - Kramam**

अप क्रामतः । क्रामतो यः । यो ऽलम् । अलम् प्रजायै । प्रजायै सन्न् । प्रजाया इति प्र – जायै । सन् प्रजाम् । प्रजाम् न । प्रजामिति प्र – जाम् । न विन्दते । विन्दते वायुम् । वायुमेव । एव नियुत्वन्तम् । नियुत्वन्त७ं स्वेन । नियुत्वन्तमिति नि – युत्वन्तम् । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः । स एव । एवास्मै । अस्मै प्राणापानाभ्याम् ।

प्राणापानाभ्याम् प्रजाम् । प्राणापानाभ्यामिति प्राण – अपानाभ्याम् ।
प्रजाम् प्र । प्रजामिति प्र – जाम् । प्र जनयति । जनयति विन्दते ।
विन्दते प्रजाम् । प्रजां ँवायवे । प्रजामिति प्र – जाम् । वायवे
नियुत्वते । नियुत्वत आ । नियुत्वत इति नि – युत्वते । आ लभेत ।
लभेत ज्योगामयावी । ज्योगामयावी प्राणः । ज्योगामयावीति
ज्योक् – आमयावी । प्राणो वै । प्राण इति प्र – अनः । वै वायुः ।
वायुरपानः । अपानो नियुत् । अपान इत्यप – अनः ।
नियुत् प्राणापानौ । नियुदिति नि – युत् । प्राणापानौ खलु ।
प्राणापानाविति प्राण–अपानौ । खलु वै । वा एतस्मात् । एतस्मादप ।
अप क्रामतः । क्रामतो यस्य । यस्य ज्योक् । ज्योगामयति ।
आमयति वायुम् । वायुमेव । एव नियुत्वन्तम् । नियुत्वन्त७ स्वेन ।
नियुत्वन्तमिति नि – युत्वन्तम् । स्वेन भागधेयेन । भागधेयेनोप ।
भागधेयेनेति भाग – धेयेन । उप धावति । **3 (50/65)**

**T.S.2.1.1.4 - Kramam**

धावति सः । स एव । एवास्मिन्न् । अस्मिन् प्राणापानौ । प्राणापानौ
दधाति । प्राणापानाविति प्राण – अपानौ । दधात्युत । उत यदि ।

यदीतासुः । इतासुर् भवति । इतासुरितीत–असुः । भवति जीवति ।
जीवत्येव । एव प्रजापतिः । प्रजापतिर् वै । प्रजापतिरिति
प्रजा – पतिः । वा इदम् । इदमेकः । एक आसीत् । आसीथ् सः ।
सोऽकामयत । अकामयत प्रजाः । प्रजाः पशून् । प्रजा इति
प्र – जाः । पशून्थ् सृजेय । सृजेयेति । इति सः । स आत्मनः ।
आत्मनो वपाम् । वपामुत् । उदक्खिदत् । अक्खिदत् ताम् । तामग्नौ ।
अग्नौ प्र । प्रागृह्णात् । अगृह्णात् ततः । ततोऽजः । अजस्तूपरः ।
तूपरः सम् । समभवत् । अभवत् तम् । तꣳ स्वायै । स्वायै देवतायै ।
देवताया आ । आऽलभत । अलभत ततः । ततो वै । वै सः ।
स प्रजाः । प्रजाः पशून् । प्रजा इति प्र – जाः । पशूनसृजत ।
असृजत यः । यः प्रजाकामः । प्रजाकामः पशुकामः ।
प्रजाकाम इति प्रजा – कामः । **4 (50/56)**

**T.S.2.1.1.5 - Kramam**

पशुकामः स्यात् । पशुकाम इति पशु – कामः । स्याथ् सः ।
स एतम् । एतम् प्राजापत्यम् । प्राजापत्यमजम् ।
प्राजापत्यमिति प्राजा – पत्यम् । अजम् तूपरम् । तूपरमा ।

आ लभेत । लभेत प्रजापतिम् । प्रजापतिमेव । प्रजापतिमिति प्रजा – पतिम् । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग–धेयेन । उप धावति । धावति सः । स एव । एवास्मै । अस्मै प्रजाम् । प्रजाम् पशून् । प्रजामिति प्र – जाम् । पशून् प्र । प्र जनयति । जनयति यत् । यच्छ्मश्रुणः । श्मश्रुणस्तत् । तत् पुरुषाणाम् । पुरुषाणाꣳ रूपम् । रूपं ँयत् । यत् तूपरः । तूप रस्तत् । तदश्वानाम् । अश्वानां ँयत् । यदन्यतोदन्न् । अन्यतोदन् तत् । अन्यतोदन्नित्यन्यतः – दन्न् । तद् गवाम् । गवां ँयत् । यदव्याः । अव्या इव । इव शफाः । शफास्तत् । तदवीनाम् । अवीनां ँयत् । यदजः । अजस्तत् । तदजानाम् । अजानामेतावन्तः । एतावन्तो वै । वै ग्राम्याः । ग्राम्याः पशवः । पशवस्तान् । तान् रूपेण । **5** (**50/56**)

**<u>T.S.2.1.1.6 - Kramam</u>**

रूपेणैव । एवाव । अव रुन्धे । रुन्धे सोमापौष्णम् । सोमापौष्णम् त्रैतम् । सोमापौष्णमिति सोमा – पौष्णम् । त्रैतमा । आ लभेत । लभेत पशुकामः । पशुकामो द्वौ । पशुकाम इति पशु – कामः ।

द्वौ वै । वा अजायै । अजायै स्तनौ । स्तनौ नाना । नानैव ।
एव द्वौ । द्वावभि । अभि जायेते । जायेते ऊर्जम् । जायेते इति
जायेते । ऊर्जम् पुष्टिम् । पुष्टिम् तृतीयः । तृतीयः सोमापूषणौ ।
सोमापूषणावेव । सोमापूषणाविति सोमा - पूषणौ । एव स्वेन ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग - धेयेन ।
उप धावति । धावति तौ । तावेव । एवास्मै । अस्मै पशून् ।
पशून् प्र । प्र जनयतः । जनयतः सोमः । सोमो वै । वै रेतोधाः ।
रेतोधाः पूषा । रेतोधा इति रेतः - धाः । पूषा पशूनाम् । पशूनाम्
प्रजनयिता । प्रजनयिता सोमः । प्रजनयितेति प्र - जनयिता ।
सोम एव । एवास्मै । अस्मै रेतः । रेतो दधाति । दधाति पूषा ।
पूषा पशून् । पशून् प्र । प्र जनयति । जनयत्यौदुम्बरः ।
औदुम्बरो यूपः ( ) । यूपो भवति । भवत्यूर्क् । ऊर्ग्वै । वा उदुंबरः ।
उदुम्बर ऊर्क् । ऊर्क् पशवः । पशव ऊर्जा । ऊर्जैव । एवास्मै ।
अस्मा ऊर्जम् । ऊर्जम् पशून् । पशूनव । अव रुन्धे । रुन्ध इति
रुन्धे ॥ **6** (**63/70**)

*(अप्रदाहाय भवत्येव – प्रजाया – आमयति वायुमेव नियुत्वत॒ स्वेन भागधेयेनोप – प्रजाकाम – स्तान् – यूप – स्त्रयोदश च ) (A1)*

**T.S.2.1.2.1 - Kramam**

प्रजापतिः प्रजाः । प्रजापतिरिति प्रजा – पतिः । प्रजा असृजत ।
प्रजा इति प्र–जाः । असृजत ताः । ता अस्मात् । अस्माथ् सृष्टाः ।
सृष्टाः पराचीः । पराचीरायन्न् । आयन् ताः । ता वरुणम् ।
वरुणमगच्छन्न् । अगच्छन् ताः । ता अनु । अन्वैत् । ऐत् ताः ।
ताः पुनः । पुनरयाचत । अयाचत ताः । ता अस्मै । अस्मै न ।
न पुनः । पुनरददात् । अददाथ् सः । सोऽब्रवीत् । अब्रवीद् वरम् ।
वरं ँवृणीष्व । वृणीष्वाथ । अथ मे । मे पुनः । पुनर् देहि । देहीति ।
इति तासाम् । तासां ँवरम् । वरमा । आऽलभत । अलभत सः ।
स कृष्णः । कृष्ण एकशितिपात् । एकशितिपादभवत् ।
एकशितिपादित्येक – शितिपात् । अभवद् यः । यो वरुणगृहीतः ।
वरुणगृहीतः स्यात् । वरुणगृहीत इति वरुण–गृहीतः । स्याथ् सः ।
स एतम् । एतं ँवारुणम् । वारुणम् कृष्णम् । कृष्णमेकशितिपादम् ।

एकशितिपादमा । एकशितिपादमित्येक – शितिपादम् । आ लभेत ।
लभेत वरुणम् । वरुणमेव । **7** (**50/55**)

**T.S.2.1.2.2 - Kramam**

एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति
भाग – धेयेन । उप धावति । धावति सः । स एव । एवैनम् ।
एनं ँवरुणपाशात् । वरुणपाशान् मुञ्चति । वरुणपाशादिति
वरुण – पाशात् । मुञ्चति कृष्णः । कृष्ण एकशितिपात् ।
एकशितिपाद् भवति । एकशितिपादित्येक – शितिपात् । भवति
वारुणः । वारुणो हि । ह्येषः । एष देवतया । देवतया समृद्ध्यै ।
समृद्ध्यै सुवर्भानुः । समृद्ध्या इति सं–ऋद्ध्यै । सुवर्भानुरासुरः ।
सुवर्भानुरिति सुवः – भानुः । आसुरः सूर्यम् । सूर्यम् तमसा ।
तमसाऽविद्ध्यत् । अविद्ध्यत् तस्मै । तस्मै देवाः ।
देवाः प्रायश्चित्तिम् । प्रायश्चित्तिमैच्छन्न् । ऐच्छन् तस्य । तस्य यत् ।
यत् प्रथमम् । प्रथमम् तमः । तमोऽपाघ्नन्न् । अपाघ्नन्थ् सा ।
अपाघ्नन्नित्यप – अघ्नन्न् । सा कृष्णा । कृष्णा ऽविः । अविरभवत् ।
अभवद् यत् । यद् द्वितीयम् । द्वितीय॒ँ सा । सा फल्गुनी ।

फल्गुनी यत् । यत् तृतीयम् । तृतीय॒ꣳ सा । सा बलक्षी ।

बलक्षी यत् । यदद्ध्यस्थात् । अद्ध्यस्थादपाकृन्तन्न् ।

अद्ध्यस्थादित्यधि – अस्थात् । अपाकृन्तन्थ् सा ।

अपाकृन्तन्नित्यप – अकृन्तन्न् । साऽविः ।

अविर् वशा । वशा सम् । **8** (**50/58**)

**<u>T.S.2.1.2.3 - Kramam</u>**

समभवत् । अभवत् ते । ते देवाः । देवा अब्रुवन्न् । अब्रुवन् देवपशुः ।

देवपशुर् वै । देवपशुरिति देव – पशुः । वा अयम् । अय॒ꣳ सम् ।

समभूत् । अभूत् कस्मै । कस्मा इमम् । इममा । आ लफ्स्यामहे ।

लफ्स्यामह इति । इत्यथ । अथ वै । वै तर्.हि । तर्.ह्यल्पा ।

अल्पा पृथिवी । पृथिव्यासीत् । आसीदजाताः । अजाता ओषधयः ।

ओषधयस्ताम् । तामविम् । अविं ँवशाम् । वशामादित्येभ्यः ।

आदित्येभ्यः कामाय । कामाया । आऽलभन्त । अलभन्त ततः ।

ततो वै । वा अप्रथत । अप्रथत पृथिवी । पृथिव्यजायन्त ।

अजायन्तौषधयः । ओषधयो यः । यः कामयेत । कामयेत प्रथेय ।

प्रथेय पशुभिः । पशुभिः प्र । पशुभिरिति पशु – भिः । प्र प्रजया ।

प्रजया जायेय । प्रजयेति प्र - जया । जायेयेति । इति सः ।

स एताम् । एतामविम् । अविं ँवशाम् । वशामादित्येभ्यः ।

आदित्येभ्यः कामाय । कामाया । **9 (50/53)**

**T.S.2.1.2.4 - Kramam**

आ लभेत । लभेतादित्यान् । आदित्यानेव । एव कामम् । कामꣳ

स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन ।

उप धावति । धावति ते । त एव । एवैनम् । एनं प्रथयन्ति । प्रथयन्ति

पशुभिः । पशुभिः प्र । पशुभिरिति पशु - भिः । प्र प्रजया ।

प्रजया जनयन्ति । प्रजयेति प्र - जया । जनयन्त्यसौ ।

असावादित्यः । आदित्यो न । न वि । व्यरोचत । अरोचत तस्मै ।

तस्मै देवाः । देवाः प्रायश्चित्तिम् । प्रायश्चित्तिमैच्छन्न् । ऐच्छन् तस्मै ।

तस्मा एताः । एता मल्.हाः । मल्.हा आ । आ ऽलभन्त ।

अलभन्ताग्नेयीम् । आग्नेयीम् कृष्णग्रीवीम् । कृष्णग्रीवीꣳ

सꣳहिताम् । कृष्णग्रीवीमिति कृष्ण - ग्रीवीम् । सꣳहितामैन्द्रीम् ।

सꣳहितामिति सं - हिताम् । ऐन्द्रीꣳ श्वेताम् । श्वेताम्

बार्.हस्पत्याम् । बार्.हस्पत्याम् ताभिः । ताभिरेव । एवास्मिन्न् ।

अस्मिन् रुचम् । रुचमदधुः । अदधुर् यः । यो ब्रह्मवर्चसकामः ।
ब्रह्मवर्चसकामः स्यात् । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस – कामः ।
स्यात् तस्मै । तस्मा एताः । एता मल्.हाः । मल्.हा आ ।
आ लभेत । लभेताग्नेयीम् । **10 (50/56)**

**T.S.2.1.2.5 - Kramam**

आग्नेयीम् कृष्णग्रीवीम् । कृष्णग्रीवी॒ सꣳहिताम् । कृष्णग्रीवीमिति
कृष्ण – ग्रीवीम् । सꣳहितामैन्द्रीम् । सꣳहितामिति सं – हिताम् ।
ऐन्द्री॑ श्वेताम् । श्वेताम् बार्.हस्पत्याम् । बार्.हस्पत्यामेताः । एता
एव । एव देवताः । देवताः स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।
भागधेयेनेति भाग – धेयेन । उप धावति । धावति ताः । ता एव ।
एवास्मिन्न् । अस्मिन् ब्रह्मवर्चसम् । ब्रह्मवर्चसम् दधति ।
ब्रह्मवर्चसमिति ब्रह्म–वर्चसम् । दधति ब्रह्मवर्चसी । ब्रह्मवर्चस्येव ।
ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव भवति । भवति वसन्ता ।
वसन्ता प्रातः । प्रातराग्नेयीम् । आग्नेयीम् कृष्णग्रीवीम् ।
कृष्णग्रीवीमा । कृष्णग्रीवीमिति कृष्ण – ग्रीवीम् । आ लभेत ।
लभेत ग्रीष्मे । ग्रीष्मे मद्ध्यन्दिने । मद्ध्यन्दिने सꣳहिताम् ।

सꣳहितामैन्द्रीम् । सꣳहितामिति सं - हिताम् । ऐन्द्रीꣳ शरदि ।

शरद्यपराह्णे । अपराह्णे श्वेताम् । अपराह्ण इत्यपर - अह्ने । श्वेताम्

बार्.हस्पत्याम् । बार्.हस्पत्याम् त्रीणि । त्रीणि वै । वा आदित्यस्य ।

आदित्यस्य तेजाꣳसि । तेजाꣳसि वसन्ता । वसन्ता प्रातः ।

प्रातर् ग्रीष्मे । ग्रीष्मे मद्ध्यन्दिने । मद्ध्यन्दिने शरदि । शरद्यपराह्णे ।

अपराह्णे यावन्ति । अपराह्ण इत्यपर - अह्ने । यावन्त्येव ।

एव तेजाꣳसि । तेजाꣳसि तानि । तान्येव । एवाव । **11 (50/59)**

**T.S.2.1.2.6 - Kramam**

अव रुन्धे । रुन्धे सम्ँवथ्सरम् । सम्ँवथ्सरम् पर्यालभ्यन्ते ।

सम्ँवथ्सरमिति सं - वथ्सरम् । पर्यालभ्यन्ते सम्ँवथ्सरः ।

पर्यालभ्यन्त इति परि - आलभ्यन्ते । सम्ँवथ्सरो वै । सम्ँवथ्सर

इति सं - वथ्सरः । वै ब्रह्मवर्चसस्य । ब्रह्मवर्चसस्य प्रदाता ।

ब्रह्मवर्चसस्येति ब्रह्म - वर्चसस्य । प्रदाता सम्ँवथ्सरः । प्रदातेति

प्र - दाता । सम्ँवथ्सर एव । सम्ँवथ्सर इति सम् - वथ्सरः ।

एवास्मै । अस्मै ब्रह्मवर्चसम् । ब्रह्मवर्चसम् प्र । ब्रह्मवर्चसमिति

ब्रह्म - वर्चसम् । प्र यच्छति । यच्छति ब्रह्मवर्चसी । ब्रह्मवर्चस्येव ।

ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव भवति । भवति गर्भिणयः ।
गर्भिणयो भवन्ति । भवन्तीन्द्रियम् । इन्द्रियं वै । वै गर्भः ।
गर्भ इन्द्रियम् । इन्द्रियमेव । एवास्मिन्न् । अस्मिन् दधति ।
दधति सारस्वतीम् । सारस्वतीम् मेषीम् । मेषीमा । आ लभेत ।
लभेत यः । य ईश्वरः । ईश्वरो वाचः । वाचो वदितोः ।
वदितोः सन्न् । सन् वाचम् । वाचम् न । न वदेत् । वदेद् वाक् ।
वाग् वै । वै सरस्वती । सरस्वती सरस्वतीम् । सरस्वतीमेव ।
एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।
भागधेयेनेति भाग – धेयेन । उप धावति । धावति सा । सैव ।
एवास्मिन्न् । अस्मिन् वाचम् । **12 (50/59)**

**T.S.2.1.2.7 - Kramam**

वाचम् दधाति । दधाति प्रवदिता । प्रवदिता वाचः । प्रवदितेति
प्र – वदिता । वाचो भवति । भवत्यपन्नदती । अपन्नदती भवति ।
अपन्नदतीत्यपन्न – दती । भवति तस्मात् । तस्मान् मनुष्याः ।
मनुष्याः सर्वाम् । सर्वां वाचम् । वाचं वदन्ति । वदन्त्याग्नेयम् ।
आग्नेयं कृष्णग्रीवम् । कृष्णग्रीवमा । कृष्णग्रीवमिति कृष्ण–ग्रीवम् ।

आ लभेत । लभेत सौम्यम् । सौम्यम् बभ्रुम् । बभ्रुम् ज्योगामयावी ।
ज्योगामयाव्यग्निम् । ज्योगामायावीति ज्योक् – आमयावी ।
अग्निं ँवै । वा एतस्य । एतस्य शरीरम् । शरीरम् गच्छति । गच्छति
सोमम् । सोम७ँ रसः । रसो यस्य । यस्य ज्योक् । ज्योगामयति ।
आमयत्यग्नेः । अग्नेरेव । एवास्य । अस्य शरीरम् । शरीरम्
निष्क्रीणाति । निष्क्रीणाति सोमात् । निष्क्रीणातीति निः – क्रीणाति ।
सोमाद् रसम् । रसमुत । उत यदि । यदीतासुः । इतासुर् भवति ।
इतासुरितीत – असुः । भवति जीवति । जीवत्येव । एव सौम्यम् ।
सौम्यम् बभ्रुम् । बभ्रुमा । आ लभेत । लभेताग्नेयम् ।
आग्नेयम् कृष्णग्रीवम् । कृष्णग्रीवम् प्रजाकामः ।
कृष्णग्रीवमिति कृष्ण – ग्रीवम् । प्रजाकामः सोमः ।
प्रजाकाम इति प्रजा – कामः । सोमो वै । **13 (50/58)**

**T.S.2.1.2.8 - Kramam**

वै रेतोधाः । रेतोधा अग्निः । रेतोधा इति रेतः – धाः ।
अग्निः प्रजानाम् । प्रजानाम् प्रजनयिता । प्रजानामिति प्र–जानाम् ।
प्रजनयिता सोमः । प्रजनयितेति प्र – जनयिता । सोम एव ।

एवास्मै । अस्मै रेतः । रेतो दधाति । दधात्यग्निः । अग्निः प्रजाम् ।
प्रजाम् प्र । प्रजामिति प्र – जाम् । प्र जनयति । जनयति विन्दते ।
विन्दते प्रजाम् । प्रजामाग्नेयम् । प्रजामिति प्र – जाम् । आग्नेयम्
कृष्णग्रीवम् । कृष्णग्रीवमा । कृष्णग्रीवमिति कृष्ण – ग्रीवम् ।
आ लभेत । लभेत सौम्यम् । सौम्यम् बभ्रुम् । बभ्रुं ँयः ।
यो ब्राह्मणः । ब्राह्मणो विद्याम् । विद्यामनूच्य । अनूच्य न ।
अनूच्येत्यनु – उच्य । न विरोचेत । विरोचेत यत् ।
विरोचेतेति वि–रोचेत । यदाग्नेयः । आग्नेयो भवति । भवति तेजः ।
तेज एव । एवास्मिन्न् । अस्मिन् तेन । तेन दधाति । दधाति यत् ।
यथ् सौम्यः । सौम्यो ब्रह्मवर्चसम् । ब्रह्मवर्चसम् तेन ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । तेन कृष्णग्रीवः । कृष्णग्रीव
आग्नेयः । कृष्णग्रीव इति कृष्ण – ग्रीवः । आग्नेयो भवति ।
भवति तमः । तम एव । एवास्मात् । अस्मादप । अप हन्ति ।
हन्ति श्वेतः । श्वेतो भवति ( ) । भवति रुचम् । **14 (50/60)**

**T.S.2.1.2.9 - Kramam**

रुचमेव । एवास्मिन्न् । अस्मिन् दधाति । दधाति बभ्रुः ।

बभ्रुः सौम्यः । सौम्यो भवति । भवति ब्रह्मवर्चसम् । ब्रह्मवर्चसमेव ।

ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । एवास्मिन्न् । अस्मिन् त्विषिम् ।

त्विषिम् दधाति । दधात्याग्नेयम् । आग्नेयम् कृष्णग्रीवम् ।

कृष्णग्रीवमा । कृष्णग्रीवमिति कृष्ण - ग्रीवम् । आ लभेत । लभेत

सौम्यम् । सौम्यम् बभ्रुम् । बभ्रुमाग्नेयम् । आग्नेयम् कृष्णग्रीवम् ।

कृष्णग्रीवम् पुरोधायाम् । कृष्णग्रीवमिति कृष्ण - ग्रीवम् ।

पुरोधाया७ स्पर्द्धमानः । पुरोधायामिति पुरः - धायाम् ।

स्पर्द्धमान आग्नेयः । आग्नेयो वै । वै ब्राह्मणः । ब्राह्मणः सौम्यः ।

सौम्यो राजन्यः । राजन्योऽभितः । अभितः सौम्यम् । सौम्यमाग्नेयौ ।

आग्नेयौ भवतः । भवतस्तेजसा । तेजसैव । एव ब्रह्मणा ।

ब्रह्मणोभयतः । उभयतो राष्ट्रम् । राष्ट्रम् परि । परि गृह्णाति ।

गृह्णात्येकधा । एकधा समावृङ्क्ते । एकधेत्येक - धा । समावृङ्क्ते

पुरः । समावृङ्क्त इति सं - आवृङ्क्ते । पुर एनम् । एनम् दधते ।

दधत इति दधते ॥ **15** (**43/49**)

*(लभेत वरुणं – वँशै – तामविं वँशामादित्येभ्यः कामाय – मल्.हा आ लभेत – तान्येव – सैवास्मिन्थ् – सोमः – स्वेतो भवति – त्रिचत्वारिꣳशच्च ) (A2)*

**T.S.2.1.3.1 - Kramam**

देवासुरा एषु । देवासुरा इति देव – असुराः । एषु लोकेषु ।
लोकेष्वस्पर्द्धन्त । अस्पर्द्धन्त सः । स एतम् । एतं वँविष्णुः ।
विष्णुर् वामनम् । वामनमपश्यत् । अपश्यत् तम् । तꣳ स्वायै ।
स्वायै देवतायै । देवताया आ । आ ऽलभत । अलभत ततः ।
ततो वै । वै सः । स इमान् । इमान् ँल्लोकान् । लोकानभि ।
अभ्यजयत् । अजयद् वैष्णवम् । वैष्णवं वाँमनम् । वामनमा ।
आ लभेत । लभेत स्पर्द्धमानः । स्पर्द्धमानो विष्णुः । विष्णुरेव ।
एव भूत्वा । भूत्वेमान् । इमान् ँल्लोकान् । लोकानभि । अभि जयति ।
जयति विषमे । विषम आ । विषम इति वि – समे । आ लभेत ।
लभेत विषमाः । विषमा इव । विषमा इति वि – समाः । इव हि ।
हीमे । इमे लोकाः । लोकाः समृद्ध्यै । समृद्ध्या इन्द्राय ।
समृद्ध्या इति सं – ऋद्ध्यै । इन्द्राय मन्युमते । मन्युमते मनस्वते ।

मन्युमत इति मन्यु–मते । मनस्वते ललामम् । ललामम् प्राशृङ्गम् । प्राशृङ्गमा । आ लभेत । लभेत सङ्ग्रामे । सङ्ग्रामे समँयत्ते । सङ्ग्राम इति सम् – ग्रामे । **16 (50/56)**

**T.S.2.1.3.2 - Kramam**

समँयत्त इन्द्रियेण । समँयत्त इति सं – यत्ते । इन्द्रियेण वै । वै मन्युना । मन्युना मनसा । मनसा सङ्ग्रामम् । सङ्ग्रामम् जयति । सङ्ग्राममिति सं–ग्रामम् । जयतीन्द्रम् । इन्द्रमेव । एव मन्युमन्तम् । मन्युमन्तम् मनस्वन्तम् । मन्युमन्तमिति मन्यु – मन्तम् । मनस्वन्त॰ स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग–धेयेन । उप धावति । धावति सः । स एव । एवास्मिन्न् । अस्मिन्निन्द्रियम् । इन्द्रियम् मन्युम् । मन्युम् मनः । मनो दधाति । दधाति जयति । जयति तम् । त॰ सङ्ग्रामम् । सङ्ग्राममिन्द्राय । सङ्ग्राममिति सं – ग्रामम् । इन्द्राय मरुत्वते । मरुत्वते पृश्निसक्थम् । पृश्निसक्थमा । पृश्निसक्थमिति पृश्नि – सक्थम् । आ लभेत । लभेत ग्रामकामः । ग्रामकाम इन्द्रम् । ग्रामकाम इति ग्राम–कामः । इन्द्रमेव । एव मरुत्वन्तम् । मरुत्वन्त॰ स्वेन । स्वेन भागधेयेन ।

भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति ।

धावति सः । स एव । एवास्मै । अस्मै सजातान् । सजातान् प्र ।

सजातानिति स – जातान् । प्र यच्छति । यच्छति ग्रामी । ग्राम्येव ।

एव भवति । भवति यत् । यदृषभः । ऋषभस्तेन ।

तेनैन्द्रः । **17 (50/59)**

**T.S.2.1.3.3 - Kramam**

ऐन्द्रो यत् । यत् पृश्ञिः । पृश्ञिस्तेन । तेन मारुतः ।

मारुतः समृद्ध्यै । समृद्ध्यै पश्चात् । समृद्ध्या इति सं – ऋद्ध्यै ।

पश्चात् पृश्ञिसक्थः । पृश्ञिसक्थो भवति । पृश्ञिसक्थ इति

पृश्ञि – सक्थः । भवति पश्चादन्ववसायिनीम् ।

पश्चादन्ववसायिनीमेव । पश्चादन्ववसायिनीमिति

पश्चात् – अन्ववसायिनीम् । एवास्मै । अस्मै विशम् । विशम्

करोति । करोति सौम्यम् । सौम्यम् बभ्रुम् । बभ्रुमा । आ लभेत ।

लभेतान्नकामः । अन्नकामः सौम्यम् । अन्नकाम इत्यन्न – कामः ।

सौम्यं ँवै । वा अन्नम् । अन्न७ँ सोमम् । सोममेव । एव स्वेन ।

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।

उप धावति । धावति सः । स एव । एवास्मै । अस्मा अन्नम् ।
अन्नम् प्र । प्र यच्छति । यच्छत्यन्नादः । अन्नाद एव ।
अन्नाद इत्यन्न – अदः । एव भवति । भवति बभ्रुः । बभ्रुर् भवति ।
भवत्येतत् । एतद् वै । वा अन्नस्य । अन्नस्य रूपम् ।
रूपꣳ समृद्ध्यै । समृद्ध्यै सौम्यम् । समृद्ध्या इति सं – ऋद्ध्यै ।
सौम्यम् बभ्रुम् । बभ्रुमा । आ लभेत । लभेत यम् । यमलम् ।
अलꣳ राज्याय । **18 (50/57)**

**<u>T.S.2.1.3.4 - Kramam</u>**

राज्याय सन्तम् । सन्तꣳ राज्यम् । राज्यम् न । नोपनमेत् । उपनमेथ्
सौम्यम् । उपनमेदित्युप – नमेत् । सौम्यं ँवै । वै राज्यम् ।
राज्यꣳ सोमम् । सोममेव । एव स्वेन । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति
सः । स एव । एवास्मै । अस्मै राज्यम् । राज्यम् प्र । प्र यच्छति ।
यच्छत्युप । उपैनम् । एनꣳ राज्यम् । राज्यम् नमति । नमति बभ्रुः ।
बभ्रुर् भवति । भवत्येतत् । एतद् वै । वै सोमस्य । सोमस्य रूपम् ।
रूपꣳ समृद्ध्यै । समृद्ध्या इन्द्राय । समृद्ध्या इति सं – ऋद्ध्यै ।

इन्द्राय वृत्रतुरे । वृत्रतुरे ललामम् । वृत्रतुर इति वृत्र – तुरे ।
ललामम् प्राशृङ्गम् । प्राशृङ्गमा । आ लभेत । लभेत गतश्रीः ।
गतश्रीः प्रतिष्ठाकामः । गतश्रीरिति गत – श्रीः । प्रतिष्ठाकामः
पाप्मानम् । प्रतिष्ठाकाम इति प्रतिष्ठा – कामः । पाप्मानमेव ।
एव वृत्रम् । वृत्रम् तीर्त्वा । तीर्त्वा प्रतिष्ठाम् । प्रतिष्ठाम् गच्छति ।
प्रतिष्ठामिति प्रति – स्थाम् । गच्छतीन्द्राय । इन्द्रायाभिमातिघ्ने ।
अभिमातिघ्ने ललामम् । अभिमातिघ्न इत्यभिमाति – घ्ने ।
ललामम् प्राशृङ्गम् ( ) । प्राशृङ्गमा । आ लभेत । **19** (**50/58**)

**T.S.2.1.3.5 - Kramam**

लभेत यः । यः पाप्मना । पाप्मना गृहीतः । गृहीतः स्यात् ।
स्यात् पाप्मा । पाप्मा वै । वा अभिमातिः । अभिमातिरिन्द्रम् ।
अभिमातिरित्यभि – मातिः । इन्द्रमेव । एवाभिमातिहनम् ।
अभिमातिहनꣳ स्वेन । अभिमातिहनमित्यभिमाति – हनम् ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सः । स एव । एवास्मात् ।
अस्मात् पाप्मानम् । पाप्मानमभिमातिम् । अभिमातिम् प्र ।

अभिमातिमित्यभि - मातिम् । प्र णुदते । नुदत इन्द्राय । इन्द्राय

वज्रिणे । वज्रिणे ललामम् । ललामम् प्राशृङ्गम् । प्राशृङ्गमा ।

आ लभेत । लभेत यम् । यमलम् । अल७ँ राज्याय ।

राज्याय सन्तम् । सन्त७ँ राज्यम् । राज्यम् न । नोपनमेत् ।

उपनमेदिन्द्रम् । उपनमेदित्युप - नमेत् । इन्द्रमेव । एव वज्रिणम् ।

वज्रिण७ स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति

भाग - धेयेन । उप धावति । धावति सः । स एव । एवास्मै ।

अस्मै वज्रम् । वज्रम् प्र । प्र यच्छति । यच्छति सः । स एनम् ( ) ।

एनं ँवज्रः । वज्रो भूत्यै । भूत्या इन्धे । इन्ध उप । उपैनम् । एन७ँ

राज्यम् । राज्यम् नमति । नमति ललामः । ललामः प्राशृङ्गः ।

प्राशृङ्गो भवति । भवत्येतत् । एतद् वै । वै वज्रस्य ।

वज्रस्य रूपम् । रूप७ँ समृद्ध्यै ।

समृद्ध्या इति सं - ऋद्ध्यै ॥ **20 (65/71)**

***(सङ्ग्रामे - तेना - ल - मभिमातिघ्ने ललामं प्राशृङ्गमै - नं - पञ्चदश च ) (A3)***

**T.S.2.1.4.1 - Kramam**

असावादित्यः । आदित्यो न । न वि । व्यरोचत । अरोचत तस्मै । तस्मै देवाः । देवाः प्रायश्चित्तिम् । प्रायश्चित्तिमैच्छन्न् । ऐच्छन् तस्मै । तस्मा एताम् । एताम् दशर्.षभाम् । दशर्.षभामा । दशर्.षभामिति दश - ऋषभाम् । आऽलभन्त । अलभन्त तया । तयैव । एवास्मिन्न् । अस्मिन् रुचम् । रुचमदधुः । अदधुर् यः । यो ब्रह्मवर्चसकामः । ब्रह्मवर्चसकामः स्यात् । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस - कामः । स्यात् तस्मै । तस्मा एताम् । एताम् दशर्.षभाम् । दशर्.षभामा । दशर्.षभामिति दश - ऋषभाम् । आ लभेत । लभेतामुम् । अमुमेव । एवादित्यम् । आदित्य७ स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग - धेयेन । उप धावति । धावति सः । स एव । एवास्मिन्न् । अस्मिन् ब्रह्मवर्चसम् । ब्रह्मवर्चसम् दधाति । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । दधाति ब्रह्मवर्चसी । ब्रह्मवर्चस्येव । ब्रह्मवर्चसीति ब्रह्म - वर्चसी । एव भवति । भवति वसन्ता । वसन्ता प्रातः । प्रातस्त्रीन् ।

त्रीन् ँललामान् । ललामाना । आ लभेत । लभेत ग्रीष्मे ।
ग्रीष्मे मद्ध्यन्दिने । मद्ध्यन्दिने त्रीन् । **21 (50/56)**

**T.S.2.1.4.2 - Kramam**

त्रीञ्छितिपृष्ठान् । शितिपृष्ठाञ्छरदि । शितिपृष्ठानिति शिति–पृष्ठान् ।
शरद्यपराह्णे । अपराह्णे त्रीन् । अपराह्ण इत्यपर – अह्णे ।
त्रीञ्छितिवारान् । शितिवारान् त्रीणि । शितिवारानिति शिति–वारान् ।
त्रीणि वै । वा आदित्यस्य । आदित्यस्य तेजा॑ꣳसि । तेजा॑ꣳसि
वसन्ता । वसन्ता प्रातः । प्रातर् ग्रीष्मे । ग्रीष्मे मद्ध्यन्दिने ।
मद्ध्यन्दिने शरदि । शरद्यपराह्णे । अपराह्णे यावन्ति ।
अपराह्ण इत्यपर – अह्णे ।
यावन्त्येव । एव तेजा॑ꣳसि । तेजा॑ꣳसि तानि । तान्येव । एवाव । अव
रुन्धे । रुन्धे त्रयस्त्रयः । त्रयस्त्रय आ । त्रयस्त्रय इति त्रयः – त्रयः ।
आ लभ्यन्ते । लभ्यन्ते ऽभिपूर्वम् । अभिपूर्वमेव ।
अभिपूर्वमित्यभि – पूर्वम् । एवास्मिन्न् । अस्मिन् तेजः ।
तेजो दधाति । दधाति सम्ँवथ्सरम् । सम्ँवथ्सरं पर्यालभ्यन्ते ।
सम्ँवथ्सरमिति सं – वथ्सरम् । पर्यालभ्यन्ते सम्ँवथ्सरः ।

पर्यालभ्यन्त इति परि – आलभ्यन्ते । सम्ँवथ्सरो वै ।
सम्ँवथ्सर इति सं – वथ्सरः । वै ब्रह्मवर्चसस्य । ब्रह्मवर्चसस्य
प्रदाता । बह्मवर्चसस्येति ब्रह्म – वर्चसस्य । प्रदाता सम्ँवथ्सरः ।
प्रदातेति प्र – दाता । सम्ँवथ्सर एव । सम्ँवथ्सर इति
सं – वथ्सरः । एवास्मै । अस्मै ब्रह्मवर्चसम् । ब्रह्मवर्चसम् प्र ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । प्र यच्छति । यच्छति ब्रह्मवर्चसी ।
बह्मवर्चस्येव । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव भवति ।
भवति सम्ँवथ्सरस्य । सम्ँवथ्सरस्य परस्तात् । सम्ँवथ्सरस्येति
सं – वथ्सरस्य । परस्तात् प्राजापत्यम् । प्राजापत्यम् कद्रुम् ।
प्राजापत्यमिति प्राजा – पत्यम् । कद्रुमा । **22 (50/66)**

**<u>T.S.2.1.4.3 - Kramam</u>**

आ लभेत । लभेत प्रजापतिः । प्रजापतिः सर्वाः । प्रजापतिरिति
प्रजा – पतिः । सर्वा देवताः । देवता देवतासु । देवतास्वेव ।
एव प्रति । प्रति तिष्ठति । तिष्ठति यदि । यदि बिभीयात् । बिभीयाद्
दुश्चर्मा । दुश्चर्मा भविष्यामि । दुश्चर्मेति दुः – चर्मा । भविष्यामीति ।
इति सोमापौष्णम् । सोमापौष्ण७ श्यामम् ।

सोमापौष्णमिति सोमा - पौष्णम् । श्याममा । आ लभेत । लभेत सौम्यः । सौम्यो वै । वै देवतया । देवतया पुरुषः । पुरुषः पौष्णाः । पौष्णाः पशवः । पशवः स्वया । स्वयैव । एवास्मै । अस्मै देवतया । देवतया पशुभिः । पशुभि स्त्वचम् । पशुभिरिति पशु - भिः । त्वचम् करोति । करोति न । न दुश्चर्मा । दुश्चर्मा भवति । दुश्चर्मेति दुः - चर्मा । भवति देवाः । देवाश्च । च वै । वै यमः । यमश्च । चास्मिन्न् । अस्मिन् ँल्लोके । लोकेऽस्पर्द्धन्त । अस्पर्द्धन्त सः । स यमः । यमो देवानाम् । देवानामिन्द्रियम् । इन्द्रियं ँवीर्यम् । वीर्यमयुवत । अयुवत तत् । तद् यमस्य । यमस्य यमत्वम् । **23 (50/55)**

**T.S.2.1.4.4 - Kramam**

यमत्वं ते । यमत्वमिति यम - त्वम् । ते देवाः । देवा अमन्यन्त । अमन्यन्त यमः । यमो वै । वा इदम् । इदमभूत् । अभूद् यत् । यद् वयम् । वय७ स्मः । स्म इति । इति ते । ते प्रजापतिम् । प्रजापतिमुप । प्रजापतिमिति प्रजा - पतिम् । उपाधावन्न् । अधावन्थ् सः । स एतौ । एतौ प्रजापतिः । प्रजापतिरात्मनः ।

प्रजापतिरिति प्रजा – पतिः । आत्मन उक्षवशौ । उक्षवशौ निः ।
उक्षवशावित्युक्ष – वशौ । निरमिमीत । अमिमीत ते । ते देवाः ।
देवा वैष्णावरुणीम् । वैष्णावरुणीं वँशाम् । वैष्णावरुणीमिति
वैष्णा – वरुणीम् । वशामा । आ ऽलभन्त । अलभन्तैन्द्रम् ।
ऐन्द्रमुक्षाणम् । उक्षाणं तम् । तं वँरुणेन । वरुणेनैव । एव
ग्राहयित्वा । ग्राहयित्वा विष्णुना । विष्णुना यज्ञेन । यज्ञेन प्र ।
प्राणुदन्त । अनुदन्तैन्द्रेण । ऐन्द्रेणैव । एवास्य । अस्येन्द्रियम् ।
इन्द्रियमवृञ्चत । अवृञ्चत यः । यो भ्रातृव्यवान् ।
भातृव्यवान्थ् स्यात् । भातृव्यवानिति भातृव्य – वान् । स्याथ् सः ।
स स्पर्द्धमानः । स्पर्द्धमानो वैष्णावरुणीम् । वैषावरुणीं वँशाम् ।
वैष्णावरुणीमिति वैष्णा – वरुणीं । **24 (50/57)**

**T.S.2.1.4.5 - Kramam**

वशामा । आ लभेत । लभेतैन्द्रम् । ऐन्द्रमुक्षाणम् । उक्षाणं वँरुणेन ।
वरुणेनैव । एव भ्रातृव्यम् । भ्रातृव्यं ग्राहयित्वा । ग्राहयित्वा विष्णुना ।
विष्णुना यज्ञेन । यज्ञेन प्र । प्र णुदते । नुदत ऐन्द्रेण । ऐन्द्रेणैव ।
एवास्य । अस्येन्द्रियम् । इन्द्रियं वृँङ्क्ते । वृङ्क्ते भवति ।

भवत्यात्मना । आत्मना परा । पराऽस्य । अस्य भ्रातृव्यः ।
भ्रातृव्यो भवति । भवतीन्द्रः । इन्द्रो वृत्रम् । वृत्रमहन्न् । अहन् तम् ।
तं ँवृत्रः । वृत्रो हतः । हतः षोडशभिः । षोडशभिर् भोगैः ।
षोडशभिरिति षोडश – भिः । भोगैरसिनात् । असिनात् तस्य ।
तस्य वृत्रस्य । वृत्रस्य शीर्.षतः । शीर्.षतो गावः । गाव उत् ।
उदायन्न् । आयन् ताः । ता वैदेह्यः । वैदेह्यो ऽभवन्न् । अभवन्
तासाम् । तासामृषभः । ऋषभो जघने । जघनेऽनु । अनूत् । उदैत् ।
ऐत् तम् । तमिन्द्रः । इन्द्रो ऽचायत् । **25 (50/51)**

**T.S.2.1.4.6 - Kramam**

अचायथ् सः । सो ऽमन्यत । अमन्यत यः । यो वै । वा इमम् ।
इममालभेत । आलभेत मुच्येत । आलभेतेत्या – लभेत ।
मुच्येतास्मात् । अस्मात् पाप्मनः । पाप्मन इति । इति सः ।
स आग्नेयम् । आग्नेयं कृष्णग्रीवम् । कृष्णग्रीवमा । कृष्णग्रीवमिति
कृष्ण–ग्रीवम् । आऽलभत । अलभतैन्द्रम् । ऐन्द्रमृषभम् ।
ऋषभं तस्य । तस्याग्निः । अग्निरेव । एव स्वेन । स्वेन भागधेयेन ।
भागधेयेनोपसृतः । भागधेयेनेति भाग–धेयेन । उपसृतः षोडशधा ।

उपसृत इत्युप – सृतः । षोडशधा वृत्रस्य । षोडशधेति
षोडश – धा । वृत्रस्य भोगान् । भोगानपि । अप्यदहत् ।
अदहदैन्द्रेण । ऐन्द्रेणेन्द्रियम् । इन्द्रियमात्मन्न् । आत्मन्नधत्त ।
अधत्त यः । यः पाप्मना । पाप्मना गृहीतः । गृहीतः स्यात् ।
स्याथ् सः । स आग्नेयम् । आग्नेयं कृष्णग्रीवम् । कृष्णग्रीवमा ।
कृष्णग्रीवमिति कृष्ण–ग्रीवम् । आ लभेत । लभेतैन्द्रम् ।
ऐन्द्रमृषभम् । ऋषभमग्निः । अग्निरेव । एवास्य । अस्य स्वेन ।
स्वेन भागधेयेन । भागधेयेनोपसृतः । भागधेयेनेति भाग – धेयेन ।
उपसृतः पाप्मानम् । उपसृत इत्युप – सृतः । **26 (50/58)**

**T.S.2.1.4.7 - Kramam**

पाप्मानमपि । अपि दहति । दहत्यैन्द्रेण । ऐन्द्रेणेन्द्रियम् ।
इन्द्रियमात्मन्न् । आत्मन् धत्ते । धत्ते मुच्यते । मुच्यते पाप्मनः ।
पाप्मनो भवति । भवत्येव । एव द्यावापृथिव्याम् । द्यावापृथिव्याम्
धेनुम् । द्यावापृथिव्यामिति द्यावा–पृथिव्याम् । धेनुमा । आ लभेत ।
लभेत ज्योगपरुद्धः । ज्योगपरुद्धो ऽनयोः । ज्योगपरुद्ध इति
ज्योक्–अपरुद्धः । अनयोर्. हि । हि वै । वा एषः । एषोऽप्रतिष्ठितः ।

अप्रतिष्ठितोऽथ । अप्रतिष्ठित इत्यप्रति – स्थितः । अथैषः ।

एष ज्योक् । ज्योगपरुद्धः । अपरुद्धो द्यावापृथिवी ।

अपरुद्ध इत्यप – रुद्धः । द्यावापृथिवी एव । द्यावापृथिवी इति

द्यावा – पृथिवी । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।

भागधेयेनेति भाग – धेयेन । उप धावति । धावति ते । ते एव ।

ते इति ते । एवैनम् । एनम् प्रतिष्ठाम् । प्रतिष्ठाम् गमयतः ।

प्रतिष्ठामिति प्रति – स्थाम् । गमयतः प्रति । प्रत्येव । एव तिष्ठति ।

तिष्ठति पर्यारिणी । पर्यारिणी भवति । भवति पर्यारी । पर्यारीव ।

इव हि । ह्येतस्य । एतस्य राष्ट्रम् । राष्ट्रँ यः । यो ज्योगपरुद्धः ।

ज्योगपरुद्धः समृद्ध्यै । ज्योगपरुद्ध इति ज्योक् – अपरुद्धः ।

समृद्ध्यै वायव्यम् ( ) । समृद्ध्या इति सं – ऋद्ध्यै ।

वायव्यँ वथ्सम् । **27 (50/60)**

**T.S.2.1.4.8 - Kramam**

वथ्समा । आ लभेत । लभेत वायुः । वायुर् वै । वा अनयोः ।

अनयोर् वथ्सः । वथ्स इमे । इमे वै । वा एतस्मै । एतस्मै लोकाः ।

लोका अपशुष्काः । अपशुष्का विट् । अपशुष्का इत्यप – शुष्काः ।

विडपशुष्का । अपशुष्काऽथ । अपशुष्केत्यप – शुष्का । अथैषः ।
एष ज्योक् । ज्योगपरुद्धः । अपरुद्धो वायुम् । अपरुद्ध
इत्यप – रुद्धः । वायुमेव । एव स्वेन । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति
सः । स एव । एवास्मै । अस्मा इमान् । इमान् ँल्लोकान् । लोकान्.
विशम् । विशं प्र । प्र दापयति । दापयति प्र । प्रास्मै । अस्मा इमे ।
इमे लोकाः । लोकाः स्नुवन्ति । स्नुवन्ति भुञ्चती । भुञ्चत्येनम् ।
एनं ँविट् । विडुप । उप तिष्ठते । तिष्ठत इति तिष्ठते ॥ **28** (**42/46**)

*(मद्ध्यन्दिने – कद्रूं – ँयमस्य – स्पद्र्धमानो वैष्णावरुणीं – तमिन्द्रो – ऽस्य स्वेन भागधेयेनोपसृतो – वायव्यं – द्विचत्वारिँ॒शच्च) (A4)*

**T.S.2.1.5.1 - Kramam**

इन्द्रो वलस्य । वलस्य बिलम् । बिलमप । अपौर्णोत् । और्णोथ्
सः । स यः । य उत्तमः । उत्तमः पशुः । उत्तम इत्युत् – तमः ।
पशुरासीत् । आसीत् तम् । तम् पृष्ठम् । पृष्ठम् प्रति । प्रति सङ्गृह्य ।
सङ्गृह्योत् । सङ्गृह्येति सं – गृह्य । उदक्खिदत् । अक्खिदत् तम् ।

तꣳ सहस्रम् । सहस्रम् पशवः । पशवोऽनु । अनूत् । उदायन्न् ।
आयन्थ् सः । स उन्नतः । उन्नतोऽभवत् । उन्नत इत्युत् – नतः ।
अभवद् यः । यः पशुकामः । पशुकामः स्यात् । पशुकाम इति
पशु – कामः । स्याथ् सः । स एतम् । एतमैन्द्रम् । ऐन्द्रमुन्नतम् ।
उन्नतमा । उन्नतमित्युत्–नतम् । आ लभेत । लभेतेन्द्रम् । इन्द्रमेव ।
एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति
भाग – धेयेन । उप धावति । धावति सः । स एव । एवास्मै ।
अस्मै पशून् । पशून् प्र । प्र यच्छति । यच्छति पशुमान् ।
पशुमानेव । पशुमानिति पशु – मान् । एव भवति । भवत्युन्नतः ।
उन्नतो भवति । उन्नत इत्युत् – नतः । **29 (50/58)**

**T.S.2.1.5.2 - Kramam**

भवति साहस्री । साहस्री वै । वा एषा । एषा लक्ष्मी । लक्ष्मी यत् ।
यदुन्नतः । उन्नतो लक्ष्मिया । उन्नत इत्युत् – नतः । लक्ष्मियैव ।
एव पशून् । पशूनव । अव रुन्धे । रुन्धे यदा । यदा सहस्रम् ।
सहस्रम् पशून् । पशून् प्राप्नुयात् । प्राप्नुयादथ । प्राप्नुयादिति
प्र – आप्नुयात् । अथ वैष्णवम् । वैष्णवँ वामनम् । वामनमा ।

आ लभेत । लभेतैतस्मिन्न् । एतस्मिन् वै । वै तत् । तथ् सहस्रम् ।
सहस्रमधि । अद्ध्यतिष्ठत् । अतिष्ठत् तस्मात् । तस्मादेषः ।
एष वामनः । वामनः समीषितः । समीषितः पशुभ्यः ।
समीषित इति सं–ईषितः । पशुभ्य एव । पशुभ्य इति पशु–भ्यः ।
एव प्रजातेभ्यः । प्रजातेभ्यः प्रतिष्ठाम् । प्रजातेभ्य इति प्र–जातेभ्यः ।
प्रतिष्ठाम् दधाति । प्रतिष्ठामिति प्रति – स्थाम् । दधाति कः ।
कोऽर्.हति । अर्.हति सहस्रम् । सहस्रम् पशून् । पशून् प्राप्तुम् ।
प्राप्तुमिति । प्राप्तुमिति प्र – आप्तुम् । इत्याहुः । आहुरहोरात्राणि ।
अहोरात्राण्येव । अहोरात्राणीत्यहः – रात्राणि । एव सहस्रम् ।
सहस्रꣳ सम्पाद्य । सम्पाद्या । सम्पाद्येति सं – पाद्य । आ लभेत ।
लभेत पशवः । **30 (50/58)**

**T.S.2.1.5.3 - Kramam**

पशवो वै । वा अहोरात्राणि । अहोरात्राणि पशून् ।
अहोरात्राणीत्यहः – रात्राणि । पशूनेव । एव प्रजातान् ।
प्रजातान् प्रतिष्ठाम् । प्रजातानिति प्र – जातान् । प्रतिष्ठाम् गमयति ।
प्रतिष्ठामिति प्रति–स्थाम् । गमयत्योषधीभ्यः । ओषधीभ्यो वेहतम् ।

ओषधीभ्य इत्योषधि - भ्यः । वेहतमा । आ लभेत । लभेत

प्रजाकामः । प्रजाकाम ओषधयः । प्रजाकाम इति प्रजा - कामः ।

ओषधयो वै । वा एतम् । एतम् प्रजायै । प्रजायै परि । प्रजाया इति

प्र - जायै । परि बाधन्ते । बाधन्ते यः । योऽलम् । अलम् प्रजायै ।

प्रजायै सन्न् । प्रजाया इति प्र - जायै । सन् प्रजाम् । प्रजाम् न ।

प्रजामिति प्र - जाम् । न विन्दते । विन्दत ओषधयः ।

ओषधयः खलु । खलु वै । वा एतस्यै । एतस्यै सूतुम् । सूतुमपि ।

अपि घ्नन्ति । घ्नन्ति या । या वेहत् । वेहद् भवति । भवत्योषधीः ।

ओषधीरेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।

भागधेयेनेति भाग - धेयेन । उप धावति । धावति ताः । ता एव ।

एवास्मै । अस्मै स्वात् । स्वाद् योनेः । योनेः प्रजाम् । प्रजाम् प्र ।

प्रजामिति प्र - जाम् । प्र जनयन्ति । जनयन्ति विन्दते ।

विन्दते प्रजाम् । **31** (**50/61**)

**T.S.2.1.5.4 - Kramam**

प्रजामापः । प्रजामिति प्र - जाम् । आपो वै । वा ओषधयः ।

ओषधयोऽसत् । असत् पुरुषः । पुरुष आपः । आप एव । एवास्मै ।

अस्मा असतः । असतः सत् । सद् ददति । ददति तस्मात् ।

तस्मादाहुः । आहुर् यः । यश्च । चैवम् । एवं वेद । वेद यः । यश्च ।

च न । नापः । आपस्तु । त्वाव । वावासतः । असतः सत् ।

सद् ददति । ददतीति । इत्यैन्द्रीम् । ऐन्द्रीꣳ सूतवशाम् । सूतवशामा ।

सूतवशामिति सूत – वशाम् । आ लभेत । लभेत भूतिकामः ।

भूतिकामोऽजातः । भूतिकाम इति भूति – कामः । अजातो वै ।

वा एषः । एष यः । योऽलम् । अलम् भूत्यै । भूत्यै सन्न् ।

सन् भूतिम् । भूतिम् न । न प्राप्नोति । प्राप्नोतीन्द्रम् ।

प्राप्नोतीति प्र – आप्नोति । इन्द्रम् खलु । खलु वै । वा एषा ।

एषा सूत्वा । सूत्वा वशा । वशा ऽभवत् । अभवदिन्द्रम् । **32 (50/54)**

**<u>T.S.2.1.5.5 - Kramam</u>**

इन्द्रमेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति

भाग – धेयेन । उप धावति । धावति सः । स एव । एवैनम् ।

एनम् भूतिम् । भूतिम् गमयति । गमयति भवति । भवत्येव । एव यम् ।

यꣳ सूत्वा । सूत्वा वशा । वशा स्यात् । स्यात् तम् । तमैन्द्रम् ।

ऐन्द्रमेव । एवा । आ लभेत । लभेतैतत् । एतद् वाव । वाव तत् ।

तदिन्द्रियम् । इन्द्रिय॑ँ साक्षात् । साक्षादेव । साक्षादिति
स–अक्षात् । एवेन्द्रियम् । इन्द्रियमव । अव रुन्धे । रुन्ध ऐन्द्राग्नम् ।
ऐन्द्राग्नम् पुनरुथ्सृष्टम् । ऐन्द्राग्नमित्यैन्द्र–अग्नम् । पुनरुथ्सृष्टमा ।
पुनरुथ्सृष्टमिति पुनः–उथ्सृष्टम् । आ लभेत । लभेत यः । य आ ।
आ तृतीयात् । तृतीयात् पुरुषात् । पुरुषाथ् सोमम् । सोमम् न ।
न पिबेत् । पिबेद् विच्छिन्नः । विच्छिन्नो वै । विच्छिन्न इति
वि – छिन्नः । वा एतस्य । एतस्य सोमपीथः । सोमपीथो यः ।
सोमपीथ इति सोम – पीथः । यो ब्राह्मणः । ब्राह्मणः सन्न् । सन्ना ।
आ तृतीयात् । **33 (50/56)**

**T.S.2.1.5.6 - Kramam**

तृतीयात् पुरुषात् । पुरुषाथ् सोमम् । सोमम् न । न पिबति ।
पिबतीन्द्राग्नी । इन्द्राग्नी एव । इन्द्राग्नी इतीन्द्र–अग्नी । एव स्वेन ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति तौ । तावेव । एवास्मै । अस्मै सोमपीथम् ।
सोमपीथम् प्र । सोमपीथमिति सोम – पीथम् । प्र यच्छतः ।
यच्छत उप । उपैनम् । एन॑ँ सोमपीथः । सोमपीथो नमति ।

सोमपीथ इति सोम–पीथः । नमति यत् । यदैन्द्रः । ऐन्द्रो भवति ।
भवतीन्द्रियम् । इन्द्रियं ँवै । वै सोमपीथः । सोमपीथ इन्द्रियम् ।
सोमपीथ इति सोम – पीथः । इन्द्रियमेव । एव सोमपीथम् ।
सोमपीथमव । सोमपीथमिति सोम – पीथम् । अव रुन्धे ।
रुन्धे यत् । यदाग्नेयः । आग्नेयो भवति । भवत्याग्नेयः । आग्नेयो वै ।
वै ब्राह्मणः । ब्राह्मणः स्वाम् । स्वामेव । एव देवताम् । देवतामनु ।
अनु सम् । सं तनोति । तनोति पुनरुथ्सृष्टः । पुनरुथ्सृष्टो भवति ।
पुनरुथ्सृष्ट इति पुनः – उथ्सृष्टः । भवति पुनरुथ्सृष्टः । पुनरुथ्सृष्ट
इव । पुनरुथ्सृष्ट इति पुनः – उथ्सृष्टः । इव हि । ह्येतस्य ।
एतस्य सोमपीथः । **34 (50/58)**

**<u>T.S.2.1.5.7 - Kramam</u>**

सोमपीथः समृद्ध्यै । सोमपीथ इति सोम – पीथः । समृद्ध्यै
ब्राह्मणस्पत्यम् । समृद्ध्या इति सं – ऋद्ध्यै । ब्राह्मणस्पत्यम्
तूपरम् । ब्राह्मणस्पत्यमिति ब्राह्मणः–पत्यम् । तूपरमा । आ लभेत ।
लभेताभिचरन्न् । अभिचरन् ब्रह्मणः । अभिचरन्नित्यभि – चरन्न् ।
ब्रह्मणस्पतिम् । पतिमेव । एव स्वेन । स्वेन भागधेयेन ।

भागधेयेनोप । भागधेयेनेति भाग - धेयेन । उप धावति ।

धावति तस्मै । तस्मा एव । एवैनम् । एनमा । आ वृश्चति ।

वृश्चति ताजक् । ताजगार्तिम् । आर्तिमा । आर्च्छति ।

ऋच्छति तूपरः । तूपरो भवति । भवति क्षुरपविः । क्षुरपविर् वै ।

